## षष्ठः पाठः

# संख्याज्ञानम्

(संख्याज्ञान और पुष्प-परिचय)

[प्रस्तुत पाठ में संस्कृत भाषा में 21 से 50 तक की संख्याओं की अभिव्यक्ति का प्रयोग दिखाया गया है। ...त्य प्रायः प्रकीर्ण हैं । इससे इन संख्याओं के प्रयोग की प्रवृत्ति विद्यार्थियों में उत्पन्न होगी। ]



अस्मिन् वर्गे पञ्चाशत् छात्राः सन्ति । एतेषु एकविंशतिः बालिकाः सन्ति । ततः नवविंशतिः (ऊनत्रिंशत्) बालकाः वर्तन्ते । विद्यालयस्य उद्याने चत्वारिंशत् पाटलपादपाः, पञ्चत्रिंशत् यूथिकाः, ...ञ्चचत्वारिंशत् मल्लिकाः, त्रिंशत् कर्णिकाराः, द्वाविंशतिः जपाः सन्ति । शरत्काले उद्यानस्य ...ञ्चविंशतिः अपि शेफालिकाः पुष्पाणि धारयन्ति । तानि पुष्पाणि प्रातःकाले भूमौ विकीर्णानि ...वन्ति । सरोवरे कमलपुष्पाणि सन्ति । अद्य चतुर्विंशतिः पुष्पाणि विकसितानि । अस्माकं देशे ...म्प्रति अष्टाविंशतिः राज्यानि सन्ति । आकाशे सप्तविंशतिः नक्षत्राणि सन्ति । जैनाः कथयन्ति यत् ...हावीरवर्धमानात् पूर्वं त्रयोविंशतिः तीर्थंकराः अभवन् । पार्श्वनाथः त्रयोविंशतितमः तीर्थंकरः ...भवत् । तेन पारसनाथपर्वतस्य प्रसिद्धिः ।

अस्माकं मुखे द्वात्रिंशत् दन्ताः भवन्ति । एकस्मिन् मासे सामान्यतः त्रिंशत् दिवसाः ...वन्ति । किन्तु जनवरी-मार्च-मई-जुलाई-अगस्त-अक्टूबर-दिसम्बर-मासेषु एकत्रिंशत् दिवसाः ...वन्ति । फरवरीमासे अष्टाविंशतिः दिवसाः सन्ति किन्तु चतुर्थे वर्षे ते ऊनत्रिंशत् भवन्ति । मम

लेखनपुस्तिकायां चत्वारिंशत् पत्राणि सन्ति । अस्मिन् पुस्तके अष्टचत्वारिंशत् पृष्ठाः सन्ति । मम गणितपुस्तिकायां षट्चत्वारिंशत् एव पत्राणि सन्ति । मम ग्रामे त्रयस्त्रिंशत् गृहाणि सन्ति । तव ग्रामे द्वाचत्वारिंशत् कूपाः सन्ति ।

## शब्दार्थः

| | | |
|---|---|---|
| अस्मिन् | = | इसमें |
| पञ्चाशत् | = | पचास |
| एकविंशतिः | = | इक्कीस |
| नवविंशतिः | = | उनतीस |
| उद्याने | = | बगीचे में |
| चत्वारिंशत् | = | चालीस |
| पाटलपादपाः | = | गुलाब के पौधे |
| पञ्चत्रिंशत् | = | पैंतीस |
| यूथिका | = | जूही |
| पञ्चचत्वारिंशत् | = | पैंतालीस |
| मल्लिकाः | = | बेला |
| त्रिंशत् | = | तीस |
| कर्णिकाराः | = | कनेर |
| द्वाविंशतिः | = | बाईस |
| जपाः | = | अड़हुल के फूल/वृक्ष |
| पञ्चविंशतिः | = | पचीस |
| शेफालिकाः | = | हरसिंगार |
| धारयन्ति | = | धारण करती हैं |

तानि = वे (नपुं॰)

प्रातःकाले = सुबह में

भूमौ = पृथ्वी पर

विकीर्णानि = बिखरे हुए

सरोवरे = तालाब में

पुष्पाणि = फूल

चतुर्विंशतिः = चौबीस

विकसितानि = विकसित / खिले हुए

अस्माकम् = हमारे

सम्प्रति = इस समय / आजकल

अष्टाविंशतिः = अट्ठाईस

यत् = कि

पूर्वम् = पहले

त्रयोविंशतिः = तेईस

तीर्थंकराः (बहुवचन) = **जैनधर्म** के प्रसिद्ध संत

अभवन् = हुए

द्वात्रिंशत् = बत्तीस

दन्ताः = दाँत

सप्तविंशतिः = सत्ताईस

एकस्मिन् मासे = एक महीने में

दिवसाः = दिन

एकत्रिंशत् = इकतीस

| | | |
|---|---|---|
| चतुर्थे वर्षे | = | चौथे साल में |
| ऊनत्रिंशत् | = | उनतीस |
| अष्टचत्वारिंशत् | = | अड़तालीस |
| लेखनपुस्तिकायाम् | = | कॉपी में |
| चत्वारिंशत् | = | चालीस |
| पत्राणि | = | पन्ने |
| मम | = | मेरे |
| षट्चत्वारिंशत् | = | छियालीस |
| एव | = | ही |
| त्रयस्त्रिंशत् | = | तैंतीस |
| गृहाणि | = | घर (बहुवचन) |
| तव | = | तुम्हारे |
| द्वाचत्वारिंशत् | = | बयालीस |
| कूपाः | = | कुएँ |

## व्याकरणम्

### प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| अभवन् | = | √भू, लङ्लकारः, प्रथमपुरुषः, बहुवचनम् |
| कथयन्ति | = | √कथ्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| भवन्ति | = | √भू, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| धारयन्ति | = | √धृ, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| सन्ति | = | √अस्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |

# अभ्यासः

## ...खिकः

निम्नलिखितानां पदानाम् उच्चारणं कुरुत -

पञ्चाशत्, एकचत्वारिंशत्, त्रिंशत्, विंशतिः, ऊनत्रिंशत्, चत्वारिंशत्, पञ्चविंशतिः, षट्त्रिंशत्, पञ्चपञ्चाशत्, चतुर्विंशतिः, अष्टाविंशतिः, त्रयस्त्रिंशत्

एकविंशतेः पञ्चाशत् यावत् संख्याः वदत ।

## ...लिखितः

निम्नलिखितानां प्रश्नानाम् उत्तरम् एकपदेन लिखत -

(क) एकस्मिन् वर्षे कति मासाः भवन्ति ?

(ख) अस्माकं देशे सम्प्रति कति राज्यानि सन्ति ?

(ग) जनवरी-मासे कियन्तः दिवसाः भवन्ति ?

(घ) कः त्रयोविंशतितमः तीर्थंकरः अभवत् ?

(ङ) अस्माकं मुखे कियन्तः दन्ताः भवन्ति ?

एकविंशतेः आरभ्य त्रिंशत् यावत् संख्याः लिखत ।

एकत्रिंशतः आरभ्य चत्वारिंशत् यावत् संख्याः लिखत ।

एकचत्वारिंशतः आरभ्य पञ्चाशत् यावत् संख्याः लिखत ।

अधोलिखितान् अङ्कान् शब्देषु (अक्षरेषु) लिखत -

23, 27, 35, 46, 50, 38, 32, 25, 39, 31

पदमञ्जूषायाः पदं चित्वा रिक्तस्थानानि पूरयत -

| एकत्रिंशत्, | दिवसाः, | अष्टाविंशतिः, | सप्तविंशतिः, | छात्राः |
|---|---|---|---|---|

(क) आकाशे ........................ नक्षत्राणि सन्ति ।

(ख) अस्माकं देशे ........................ राज्यानि सन्ति ।

(ग) मार्चमासे ........................ दिवसाः भवन्ति ।

(घ) अस्माकं वर्गे चत्वारिंशत् .................................... सन्ति ।

(ङ) एकस्मिन् मासे त्रिंशत् .................................... भवन्ति ।

9. **वचन-परिवर्तनं कुरुत -**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| यथा- | वदति | वदन्ति |
| (क) | भवति | .................. |
| (ख) | कथयति | .................. |
| (ग) | पठसि | .................. |
| (घ) | गच्छामि | .................. |
| (ङ) | अस्ति | .................. |
| (च) | असि | .................. |
| (छ) | धारयति | .................. |
| (ज) | विकसति | .................. |

10. **एतेषु किं सत्यम् असत्यम् वा, लिखत -**

| | | | |
|---|---|---|---|
| यथा- | अस्माकं मुखे पञ्चाशत् दन्ताः सन्ति । | - | असत्यम् |
| (क) | अगस्तमासे एकत्रिंशत् दिवसाः भवन्ति । | - | .................. |
| (ख) | आकाशे चतुर्विंशतिः नक्षत्राणि सन्ति । | - | .................. |
| (ग) | जुलाई-मासे त्रिंशत् दिवसाः भवन्ति । | - | .................. |
| (घ) | फरवरी-मासे त्रिंशत् दिवसाः भवन्ति । | - | .................. |
| (ङ) | पार्श्वनाथः त्रयोविंशतितमः तीर्थंकरः आसीत् । | - | .................. |

11. सुमेलनं कुरुत -

| अ | | आ |
|---|---|---|
| (क) पुष्पाणि | - | (i) पृष्ठाः |
| (ख) तीर्थंकरः | - | (ii) नक्षत्राणि |
| (ग) मुखे | - | (iii) दन्ताः |
| (घ) आकाशे | - | (iv) पार्श्वनाथः |
| (ङ) पुस्तके | - | (v) विकसन्ति |

12. अधोलिखितानां संख्यानाम् आरोहक्रमं लिखत -

द्वाविंशतिः, एकविंशतिः, पञ्चविंशतिः, चतुर्विंशतिः, सप्तविंशतिः, त्रयोविंशतिः, अष्टाविंशतिः, त्रिंशत्, नवविंशतिः, षड्विंशतिः

13. निम्नलिखितानां संख्यानाम् अवरोहक्रमं लिखत -

एकत्रिंशत्, त्रयस्त्रिंशत्, द्वात्रिंशत्, पञ्चत्रिंशत्, षट्त्रिंशत्, ऊनचत्वारिंशत्, चत्वारिंशत्, द्वाचत्वारिंशत्, चतुश्चत्वारिंशत्, त्रयश्चत्वारिंशत्, षट्चत्वारिंशत्, ऊनपञ्चाशत्, पञ्चाशत् ।

## योग्यता-विस्तारः

इक्कीस से पचास तक की संख्याओं का क्रम यहाँ दिया जाता है । इसे विद्यार्थी स्मरण कर लें ।

| | | | |
|---|---|---|---|
| एकविंशतिः | (21) | द्वाविंशतिः | (22) |
| त्रयोविंशतिः | (23) | चतुर्विंशतिः | (24) |
| पञ्चविंशतिः | (25) | षड्विंशतिः | (26) |
| सप्तविंशतिः | (27) | अष्टाविंशतिः | (28) |
| नवविंशतिः / ऊनत्रिंशत् | (29) | त्रिंशत् | (30) |

| | | | |
|---|---|---|---|
| एकत्रिंशत् | (31) | द्वात्रिंशत् | (32) |
| त्रयस्त्रिंशत् | (33) | चतुस्त्रिंशत् | (34) |
| पञ्चत्रिंशत् | (35) | षट्त्रिंशत् | (36) |
| सप्तत्रिंशत् | (37) | अष्टत्रिंशत् | (38) |
| नवत्रिंशत् / ऊनचत्वारिंशत् | (39) | चत्वारिंशत् | (40) |
| एकचत्वारिंशत् | (41) | द्विचत्वारिंशत् | (42) |
| त्रयश्चत्वारिंशत् | (43) | चतुश्चत्वारिंशत् | (44) |
| पञ्चचत्वारिंशत् | (45) | षट्चत्वारिंशत् | (46) |
| सप्तचत्वारिंशत् | (47) | अष्टचत्वारिंशत् | (48) |
| नवचत्वारिंशत् / ऊनपञ्चाशत् | (49) | पञ्चाशत् | (50) |

**2. इन्हीं शब्दों से भारत की भाषाओं में संख्या-शब्द बने हैं जैसे -**

| | | |
|---|---|---|
| एकविंशतिः | – | इक्कीस |
| द्वाविंशतिः | – | बाईस |
| एकत्रिंशत् | – | इकतीस |
| पञ्चत्रिंशत् | – | पैंतीस |
| षट्त्रिंशत् | – | छत्तीस इत्यादि । |

*****